श्री गायत्री स्तोत्रं

श्री गायत्री स्तोत्रं

नमस्ते देवि गायत्रि सावित्रि त्रिपदेऽक्षरे |
अजरे अमरे मातस्त्राहि मां भवसागरात् ||1||

नमस्ते सूर्यसंकाशे सूर्यसावित्रि कोमले |
ब्रह्मविद्ये महाविद्ये वेदमातर्नमोस्तु ते ||2||

अनंतकोटिब्रह्मांडव्यापिनि ब्रह्मचारिणि |
नित्यानंदे महामाये परेशानि नमोस्तु ते ||3||

त्वं ब्रह्मा त्वं हरिः साक्षाद्रुद्रस्त्वमिंद्रदेवता |
मित्रस्त्वं वरुणस्त्वं च त्वमग्निरश्विनौ भगः ||4||

पूषार्यमा मरुत्वांश्च ऋषयोऽपि मुनीश्वराः |
पितरो नागयक्षाश्च गंधर्वाप्सरसां गणाः ||5||

रक्षोभूतपिशाचाश्च त्वमेव परमेश्वरि |
ऋग्यजुस्सामवेदाश्च अथर्वांगिरसानि च ||6||

त्वमेव पंचभूतानि तत्त्वानि जगदीश्वरि |
ब्राह्मी सरस्वती संध्या तुरीया त्वं महेश्वरि ||7||

त्वमेव सर्वशास्त्राणि त्वमेव सर्वसंहिताः |
पुराणानि च मंत्राणि महागम मतानि च ||8||

तत्सद्ब्रह्मस्वरूपा त्वं कंचित्सदसदात्मिका |
परात्परेशि गायत्रि नमस्ते मातरंबिके ||9||

चंद्रे कलात्मिके नित्ये कालरात्रि स्वधे स्वरे |
स्वाहाकारेऽग्निवक्त्रे त्वां नमामि जगदीश्वरि ||10||

नमो नमस्ते गायत्रि सावित्रि त्वां नमाम्यहं |
सरस्वति नमस्तुभ्यं तुरीये ब्रह्मरूपिणि ||11||

अपराधसहस्राणि त्वसत्कर्मशतानि च |
मत्तो जातानि देवेशि त्वं क्षमस्व दिने दिने ||12 ||इति वसिष्ठसंहितायां गायत्री स्तोत्रं संपूर्णं||